संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

श्रीनारायणसुधीविरचितः

# भाट्टनयोद्योतः

सम्पादकः
सूर्यनारायणनागेन्द्रभट्टः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

श्रीनारायणसुधीविरचितः

# भाट्टनयोद्योतः

सम्पादकः
सूर्यनारायणनागेन्द्रभट्टः

राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

# आमुखम्

अथ विदितचरमेवैतत् समेषां यत् युगाब्दः ५१०१ (१९९९-२०००)- तमो वर्षः संस्कृतवर्षः इति भारतशासनेन समुद्घोषितः आसीत्। तदनुसारं भारतशासनेन मानवसंसाधनविकासमन्त्रालयेन, राष्ट्रियसंस्कृतसंस्थानेन अन्याभिश्च विविधाभिः संस्थाभिः राष्ट्रेऽस्मिन् कोणे कोणे बहवः बहुविधाश्च कार्यक्रमाः आयोजिताः अनुष्ठिता आसन्। ऐतिहासिकेन एतेन संस्कृतवर्षसमुद्घोषणेन संस्कृतज्ञानां संस्कृतप्रेमिणां संस्कृतबन्धूनां सामान्यजनानां च हृदयेषु यथोचितं संस्कृतविषयकं पुनर्जागरणं समुदभूत्। समग्रोऽपि राष्ट्रपरिवारः संस्कृतविषयकैः भावनाप्रचयैः सम्पूरितः समुत्तेजितश्च आसीत्।

ऐतिहासिकीम् आनन्दसन्दोहदां तामिमां संस्कृतवर्षस्मृतिं चिरस्मरणीयां विधातुं संस्कृतवर्षस्मृतिग्रन्थमाला इति नाम्ना त्रिशतस्य ग्रन्थानां प्रकाशनपर्यवसाना काचित् महत्त्वशालिनी योजना राष्ट्रियसंस्कृतसंस्थानेन स्वीकृता। योजनायामस्याम् अद्य यावत् अप्रकाशितानां शतस्य पाण्डुलिपिग्रन्थानां प्रकाशनम्, विविधासु भाषासु विरचितानां नैकशास्त्रसम्बद्धानाम् अभिनवानां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनम्, प्रान्तभाषासु प्रसिद्धानां विविधवाङ्मयप्रक्रियारूपाणां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनं च सङ्कल्पितं वर्तते। तत्र एतेष्वाद्यम् अप्रकाशित-हस्तलिखितग्रन्थप्रकाशनात्मकं सङ्कल्पं पुरस्कृत्य प्रकाशितः एषः **भाट्टनयोद्योत**नामा मीमांसाशास्त्रीयो ग्रन्थः सम्प्रति भवत्करकमलमलङ्करोति।

जैमिनीयसूत्रोपनिबद्धं पूजितविचारवचनं मीमांसाशास्त्रं तावत् विपुलार्थगर्भितं वरीवर्ति। शबर-कुमारिल-प्रभाकर-मुरारिप्रभृतिभिः जैमिनीयहृदयज्ञैः स्वीयग्रन्थेषु विस्तरेण शास्त्रार्थः प्रत्यपादि। विपुलं शास्त्रीयमर्थं संक्षेपतो निरूपयितुं श्रीमान् खण्डदेवाख्यः भाट्टदीपिकानाम्नीम् अधिकरणार्थसङ्ग्राहिकां मीमांसायाः प्रमेयप्रबोधिनीं कृतिमेकां प्राणैषीत्। तामिमां कृतिं दुरवगाहां समवलोक्य मीमांसाशास्त्रजिज्ञासून् बालान् उद्दिधीर्षुः श्रीनारायणसुधीनामकः अष्टादशशताब्दीयो विद्वान् भाट्टदीपिकामेवानुसृत्य भाट्टनयोद्योतनामानं ग्रन्थं लिलेख।

भाट्टनयोद्योतश्चैषः यद्यपि प्रायः भाट्टदीपिकानुसारी तथापि क्वचित्तदपेक्षया वैलक्षण्यमपि भजते। दीपिकायां दर्शिताः खण्डनपरा अंशाः नात्र वर्तन्ते। यत्र भाट्टदीपिकायां पूर्वपक्षो न दर्शितस्तत्र भाट्टनयोद्योते सङ्ग्रहेण पूर्वपक्षः प्रदर्शितः।

# विषयसूची

आशीर्वचनम्
शुभ सन्देश
आमुखम्
उपोद्घातः १
आधारग्रन्थसूची, सङ्केतविवरणम् १६

**प्रथमाध्याये द्वितीयः पादः**

१. अर्थवादाधिकरणम् ४५
२. विधिवन्निगदाधिकरणम्(औदुम्बराधिकरणम्) ४६
३. हेतुमन्निगदाधिकरणम् ४७
४. मन्त्रप्रामाण्याधिकरणम् ४७

**प्रथमाध्याये तृतीयः पादः**

१. स्मृत्यधिकरणम् ४८
२. विरोधाधिकरणम् शाक्यस्मृतीनामप्रामाण्यम् ४८
३. शिष्टाकोपाधिकरणम् ४९
शाक्यादिस्मृतिषु वेदाविरुद्धानामप्यप्रामाण्यम् ५०
४. आचारप्राप्राण्याधिकरणम् ५०
५. आर्यप्रसिद्धिनियामकत्वाधिकरणम् ५०
स्मृतिविरुद्धाचाराप्रामाण्यम् ५०
त्रिवृच्चर्वश्ववालाधिकरणम् ५१
६. पिकनेमाधिकरणम् ५१
७. कल्पसूत्राधिकरणम् ५१
८. होलाकाधिकरणम् ५२
९. व्याकरणप्रामाण्याधिकरणम् ५२
१०. उपोद्घातार्थं लोकवेदाधिकरणम् ५२
११. आकृत्यधिकरणम् ५३

**प्रथमाध्याये चतुर्थः पादः**

१. नामधेयप्रामाण्याधिकरणम् ५३
२. उद्भिदधिकरणम् ५४
३. चित्राधिकरणम् ५५

इन्द्रस्य त्वभिधाने गार्हपत्यमुपेत्य तत्र तिष्ठन्नैन्द्र्येन्द्रमभिदद्यादिति । तस्मान्मुख्य एव विनियोग इति प्राप्ते -

मन्त्रस्य जघन्यवृत्त्याऽप्यग्निप्रकाशकत्वसम्भवे 'प्राप्तार्थकतत्स्वारस्यानुरोधेनाप्राप्तार्थकविधिस्वारस्यत्यागायोगात् समीपगतौ समीपस्थैव कर्मत्वाच्च गार्हपत्यस्य प्रधानाभिधानकर्मत्वमेव । तद्धितश्च शक्यसम्बन्धबोधकालीनेन्द्रप्रकाशकत्वानुवादः । अतो विधिस्वारस्य त्यागायोगात्तात्पर्येण मन्त्रस्य गौण्या गार्हपत्ये विनियोगः ।।

## (३) हविष्कृदधिकरणम्

तथाऽऽह्वानमपीति चेत् ।। (मी.सू.३.२.५)

दर्शपूर्णमासयोः - हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति(तै.ब्रा.३.२.५) इति श्रुतम् । तत्र किमयं मन्त्रोऽवघाताङ्गमुताह्वानाङ्गमिति संशये -

पत्न्यैव हविष्कृदुपोत्तिष्ठति सा देवानभिदृत्यावहन्ति() इति वचनेनाह्वानस्यैवाभावादयं मन्त्रो गौणेऽवघातेऽपि विधीयते । आह्वयतिस्तु एहीतिशब्दोच्चारणसामर्थ्याद् अवहन्तरि गौणः, त्रिरित्यपि शाखान्तरप्राप्तत्रिःपाठानुवाद इति प्राप्ते -

पत्नीवाक्यं नाह्वानाभावबोधकम्, पत्न्यैवोत्तिष्ठति न त्वन्येति तदर्थात् । अतो मन्त्राह्वयतिपदयोर्गौणत्वे मानाभावाच्छाखाभेदेन प्राप्तेऽपि त्रिरभ्यासः सर्वसाधारण्याय मन्त्रवर्णप्राप्ताह्वानानुवादेन विधीयते । आह्वानस्य च सहायार्थत्वेनावघातकाल एव प्राप्तेरवघ्नन्नित्यनुवादः । तस्मादाह्वानाङ्गं मन्त्रः ।।

## (४) उत्थानाधिकरणम्

तथोत्थानविसर्जने ।। (मी.सू.३.२.१०)

सोमे - उत्तिष्ठन्नन्वाह, अग्नीदग्नीन्विहर(आ.श्रौ.१२.१७.२१) इति, तथा - व्रतं कृणुतेति वाचं विसृजति(तै.सं. ६.१.४) इति श्रुतम् । तत्र तौ मन्त्रौ ब्राह्मणे काललक्षणापत्तैरैन्द्रीवद् गौण्योत्थानवाग्विसर्गार्थाविति प्राप्ते -

उत्तिष्ठन्निति शतृप्रत्ययस्य कालिकसम्बन्धेनोपलक्षणार्थत्वमङ्गीकृत्य श्रुत्यैवान्वयोपपत्तेर्व्रतं कृणुतेत्यत्र चेतिकरणस्य मन्त्रस्वरूपलक्षणार्थमात्रपरत्वात्कालिकसम्बन्धस्यैव संसर्गविधया भानोपपत्तेर्लक्षणाऽभावेनोभयत्राप्युत्थानकाले विहरणमन्त्रः पठनीयः । व्रतं कृणुतेति मन्त्रकाले वाग्विसर्गः कार्य इति कालविधिरेव । अतोऽन्यत्रापि तन्न्यायान्मुख्यार्थौ मन्त्रौ ।।

## (५) सूक्तवाकाधिकरणम्

सूक्तवाके च कालविधिः परार्थत्वात् ।।(मी.सू.३.२.११)

दर्शपूर्णमासयोः - सूक्तवाकेन प्रस्तरं प्रहरति() इत्यत्र सूक्तवाकप्रस्तरप्रहरणयोरिष्टदेवताप्रकाशनप्रस्तरप्रतिपत्तिभ्यां कृतार्थत्वात्, दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत()

पाठान्तरम् - १.प्राप्ता ... योगात् नास्ति(क)















**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058